International Journal of Sanskrit Research 2016; 2(5): 10-14

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(5): 10-14
© 2016 IJSR
www.anantaajournal.com
Received: 04-07-2016
Accepted: 05-08-2016

अरिहंतकुमारो जैन
S.R.F., दर्शनविभाग,
मुंबई विश्वविद्यालय, मुंबई



**Correspondence**
अरिहंतकुमारो जैन
S.R.F., दर्शनविभाग,
मुंबई विश्वविद्यालय, मुंबई

# श्रमणपरम्परायां अहिंसायाः व्यावहारिकस्वरूपम्

## अरिहंतकुमारो जैन

**भारतीय-संस्कृति:** अहिंसाप्रधाना अस्ति। अत्र “अहिंसा परमो धर्मः” इति उद्घोषणं सर्वत्र मुख्यरूपेण विद्यते । श्रमणपरम्परायां सर्वैस्तीर्थंकरैराचार्यैष्च अहिंसायाः विशद-व्यावहारिकस्वरूपं प्रतिपादितम्। नैतत्स्वरूपविषये कोऽपि भ्रमः, अतः आचार्य: उमास्वामीवर्य: सर्वप्रथमं हिंसास्वरूपं प्रगटीकृतम् ‘प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा।’ (तत्त्वार्थसूत्रम् 7/13) - प्रमादयोगपरिणतिसद्भावात् कस्यापि जीवस्य घातो वधो वा हिंसा तथा च हिंसापरित्याग एवाहिंसा। तैः प्रोक्तम्, क्रोधमानमायालोभादिकषाययुक्तः रागादिभावसहितश्च परिणामः प्रमादः। एतैः प्रमादैः सह मनोवचनकायानां काभिः प्रवृत्तिभिः क्रियाभिर्वा स्वस्य परस्य वा द्रव्यप्राणान् भावप्राणान् वा घातं पीडनं वा हिंसा , तद्विरतिः अहिंसा भवति । वस्तुतो हिंसा-अहिंसे प्रत्येकस्य जीवस्य परिणामस्योपरि अवलम्बिते। तदनुसारेण यः कोऽपि सार्वभौमरूपेण नाम मनोवचनकायैः कृतकारितानुमोदनैश्च परिपूर्णरूपेण पालयति, तदेव अहिंसामहाव्रतं भवति, तत्पालनं श्रमणः (मुनिः) करोति। यदि गृहस्थ एकदेशरूपेण पालयेत् तर्हि तं श्रावकः कथ्यते, तदेव अहिंसाणुव्रतमुच्यते ।

श्रावकाय अहिंसाव्रतं व्यावहारिकं कर्तुं हिंसायाः विभाजनं चर्तृषु विभागेषु कृतम्। येन गृहस्थ: निजधर्मसमाजपरिवारराष्ट्रादि विषयेषु दक्षो भवेत्, कर्तव्यविमुखो न स्यात् तथा निजश्रावकधर्मस्य सम्यक् परिपालयन् क्रमात् विकसन् अणुव्रततो महाव्रतं पर्यन्तं श्रमणधर्मरूपेण विकासयात्रां कृत्वा आत्मकल्याणं कुर्यात् ।

### हिंसाया चत्वारो विभागा

1. **संकल्पी-हिंसा**: ज्ञानपूर्वकं संकल्पं कृत्वा कमपि पीडनं, हननं प्राणघातं वा संकल्पीहिंसा। प्रत्यकेन श्रावकेण एतादृशी हिंसा परित्यक्तव्या ।

2. **विरोधी-हिंसा**: धर्मसमाजराष्ट्राणामुपरि केनापि विग्रहः क्रियते तदा तेषां रक्षणार्थं, निजधनजनानां रक्षणार्थं च क्रियमाणा हिंसा, विरोधी-हिंसा मता।

3. **आरम्भी-हिंसा**: गृहस्थेन गृह-कृषिकार्यार्थं च विविधा कार्याणि क्रियन्ते, तत्समये भूयमाना हिंसा आरम्भीहिंसा ।

4. **उद्योगी-हिंसा:** गृहस्थो निजाश्रितानां पालनपोषणार्थं अनिवार्याजीविकासु यथायोग्योद्योगेषु च सावधानतयाऽपि हिंसति, सा उद्योगिहिंसा कथिता। अत्र विशेषतया ध्यातव्यः, प्रत्येकस्य श्रावकस्य कर्तव्योऽपि यत् तेन एतादृशी आजीविका स्वीकर्तव्या, येन हिंसा, लोकनिंदा, धर्मविरोधो च न स्यात्।

उपर्युक्तहिंसाया विभाजनस्योद्देशो यत् वयं यथाकामं स्वजीवने सावधानतया कर्तव्यपालनात् च्युतो न भवेम!

उपर्युक्तेषु हिंसायाः चर्तुषु भेदेषु प्रमादयोगसद्भावे संकल्पपूर्वकं कृता लघुगुरूसूक्ष्मादिप्राणिनां हननादिरूपा संकल्पीहिंसा तु श्रावकाणां कृते नियता परित्यजनीया। तैः अन्याः तिस्रोऽपि हिंसा यथाशक्ति परित्याज्याः, यतो गृहस्थाः तावत् सांसारिककार्याणि कर्तव्यनिर्वहनानि च कर्तव्यानि यावत् विरक्त न भवेयुः। अतो गृहस्थाश्रमे निवसन्तोऽपि आजीविकोपार्जनार्थं कृषिव्यापारादि कार्याणि कुर्वन्ति तथा देशसमाजपरिवारादीनां संरक्षणं गृहकार्याणि च नियमेन कुर्वन्ति। तदा संकल्पीहिंसायाः पूर्णत्वेन त्यागो वर्तते। किन्तु उद्योगी-आरम्भीविरोधीहिंसाभ्यः पूर्णरूपेण परित्यागो नास्ति। अतः तत्परिहारोऽपि किंचिदेव कर्तुं शक्नोति। ततोऽपि आचार्यैः केवलं संकल्पीहिंसानिवृत्तः श्रावकोऽपि अहिंसाणुव्रतीति मतम्। एतदेव अहिंसायाः व्यावहारिकस्वरूपस्य विकासः।

वस्तुतः कोऽपि विवेकी-श्रावकः विश्वस्य महत्त्वपूर्णकार्याणि कुर्वन् सहजतया अहिंसको भवितुमर्हति। एतस्मिन् जीवने अहिंसा एतावती व्यावहारिका भवति, येन तस्य कानिचिदपि कार्याणि न निरुन्धन्ति। किन्तु परमावश्यकं हिंसाऽहिंसयोः यथार्थस्वरूपज्ञानम्। तदा न तु अहिंसा अव्यवहार्या प्रतिभासते, न वा तस्यातिरेका, यतो हि श्रमणस्य श्रावकस्य च परिसीमा विभिन्नं वर्तते। श्रावकोऽहिंसापालनं निजधर्मपरिमितौ एव करोति। शक्त्यनुसारेण शक्तिप्रयोगोऽपि करोति, किन्तु एषः तस्य आपद्धर्मः, जीवरक्षैव धर्मः इत्युक्तम्, तथापि ग्रामधर्मो नगरधर्मा राष्ट्रधर्मो पासण्डधर्मो गणधर्मः संघधर्मः श्रुतधर्मश्चारित्रधर्मोऽस्तिकामधर्मश्चेतिरूपेणापि वक्तुं शक्यते। जीवरक्षा व्यावहारिकं कर्तुं हिंसायाः पूर्वोक्ताः चत्वारा अपि विभागा जनकल्याणप्रवृत्त्यर्थं निर्धारितव्याः। यथा पूर्वमेवोक्तं यत्, कोऽपि विवेकी गृहस्थः संकल्पपूर्वकं न करोति हिंसादि रूप कस्यापि जीवस्य हननं, किन्तु तस्य ग्रामनगरराष्ट्रपरिवारादीनां निजस्योपरि वा विपत्तिरागच्छेत् तर्हि तत्प्रतिकाराय शस्त्रधारणार्थं न हि विचलति। यदि शस्त्राणि न धारयेत् तर्हि नैषोऽहिंसकः, भीरुरेव। विपत्समये स्वप्राणराष्ट्रसंरक्षणार्थं क्रियमाना हिंसा वीरतैव। सोमदेवसूरिभिर्यशस्तिलकचम्पूकाव्ये उक्तं -

यः शस्त्रवृत्तिः समरे रिपुः स्याद् यः कण्टको वा निजमण्डलस्य।
तत्रैव अस्त्राणि नृपाः क्षिपन्ति न दीनकानीनकदाशयेषु।।

यो रिपुः शस्त्रैः सुसज्जितो भूत्वा संग्रामे उपस्थितः, निजदेशस्य शत्रुर्वा वीरपुरुषः तस्योपरि एव प्रहरति, न तु दीननिःशस्त्रभीरूणामुपरि।

यद्यपि सत्यमेतत्, न कोऽपि अहिंसकराष्ट्रः देशान्तरस्य अधिकारसम्पत्तिसम्मानानामुपरि आक्रमति, परं निजदेशसंरक्षणार्थं सकलानि साधनानि उपभुङ्क्ते। यथार्थतोऽहिंसाप्रयोगं वीरपुरुषा एव कुर्वन्ति, न तु भीरुः। तथैव च आध्यात्मिकक्षेत्रे यः शूरपुरुष, स एवाहिंसामहाव्रतस्य परिपालकः। तथा यो लौकिकक्षेत्रे वीरपुरुष, स गृहस्थ एव अहिंसाणुव्रतस्य पालकः। अहिंसाणुव्रतस्य विशुद्धपालनार्थं पंचदोषाणां अतिचाराणां वा त्यागोऽनिवार्यः। तथाहि –

1) **बन्धः** त्रसजीवानां पीडादायकं दारूणबन्धनम्, पंजरादिषु बन्धनम्। यथा पशुखगादीनां असहायनिरपराधीप्राणिणः हठात् पंजरेषु अन्येषु केष्वपि बन्धनम्।

2) **वधः** कांश्चिदपि प्राणिनः काष्ठ-कुशा-पाषाणादिसाधनैः पीडनं, ताडनं, हननं, दुःखदानं वा।

3) **छेदनम्**: केषांचित् अपि प्राणीनां शरीरस्य छेदनम्, कर्णनासिकाछेदनम्, विरूपं करोति वा।

4) **अतिभारः** पशुसेवकादीन् अल्पशक्तित्वेऽपि बहुभारवहनार्थं प्रेरयति,भारवहनार्थं बाध्यते वा।

5) **अन्नपानविरोधः** केषांचित् जीवानां कस्मादपि कारणात् भोजनं पानीयं मानदेयस्वरूपधनं (वेतनं) वा निरोधनं अथवा जीवनोपयोगिसाधनानामवरोधनं (अल्पकालेऽपि), सः अन्नपाननिरोधः। एतेभ्यः पंचातिचारेभ्योऽहिंसाणुव्रतं दूषितं भवति।

उपर्युक्तपंचातिचाराणां परित्यागेनैव श्रावकः निजजीवने अहिंसाणुव्रतं व्यावहारिकरूपेण सम्यक् परिपालयति। तथैव

च परनिन्दा छलप्रपंचः उपहासश्चेत्यपि हिंसैव, अत एतेषामपि त्यागः आवश्यकः। अनेन अहिंसा जीवनव्यवहारे चरितार्था भवति। एतत्स्पष्टं भवति।

अहिंसायाः येऽतिचारत्यागाः कथिताः, तेषु जीवानां छेदनस्य भेदनस्य ताडनस्य च निरोधनं नाम पूर्णरूपेण स्वतन्त्रतया सर्वेषां प्राणीनां जीवनस्याधिकारस्य सुरक्षैव। ज्ञायतेऽनेन मानवेभ्यः भीतानां त्रस्तानां च पशुखगानां लघुजीवानां च वेदनां प्रदृश्य आर्तनादं श्रुत्वा चास्माकं धर्मप्रवर्तकानां आचार्याणां च हृदि करुणा अवतरिता। अतो न केवलं अतिचारस्य निरोधार्थं आहारदोषाः परिगणिताः, अपितु बन्धनच्छेदनभेदनताडनादिरूपातिचाराणामपि त्यागस्य प्रधानत्वं प्रयच्छति। ता एव भावनाः कालान्तरेण 'वैदिकीहिंसा, हिंसा न भवति' एतादृशाणां विचाराणां विरोधमकुर्वन्। जैनचिन्तनपरम्परा कार्यसंस्कृतिश्चेति विधायकविशिष्टसूत्रैः विश्वबन्धुत्वं प्रभावकरूपेण उद्घाटितम्। तद्यथा -

> अभओ पत्थिवा! तुब्भं अभयदाया भवाहि य ।
> अणिच्चे जीवलोगम्मि, किं हिंसाए पसज्जसि ।।
> उत्तराध्ययन, 18.11

हे मनुजः! यदि त्वं निर्भयत्वमिच्छसि, तर्हि त्वमपि सर्वेभ्यः अभयं प्रयच्छ, तान् निर्भयं कुरु; यतः अस्मिन् अनित्यसंसारे जीवलोके त्वं हिंसायां किमर्थं निमग्नोऽसि? अग्रे तथैव प्रोक्तमपि -

> जं इच्छसि अप्पणत्तो, जं च न इच्छसि अप्पणत्तो।
> तं इच्छ परस्स वि या, एत्तियगं जणसासणं।।
> (समणसुत्तं)

यत् त्वमिच्छसि, तदेव सकलविश्वायापि भावय, यत्त्वं नेच्छसि, तदपरेषां कृतेऽपि मा इच्छ, मा कुरु। एतदेव तीर्थंकरैः स्वोपदेशे "एगे आया" इति सर्वेषु अन्तरंगेषु एव चैतनैव प्रवहति। अतः सर्वेषु समत्वं व्यवहर, एतदेवाचरणं सर्वश्रेष्ठमिति ।

आधुनिकयुगे अहिंसाव्रतं जीवनव्यापी कर्तुं श्रावकाय एतादृशी व्याख्या परमावश्यका। अन्यथा अहिंसाऽपि अतिवादरूपेण संभूय शस्त्रेषु एव कुण्ठिता भवेत्। जीवनस्य व्यवहारकार्ये नैव प्रतिभासेत्। अहिंसायाः व्यावहारिकरूपेणैव सकलेषु देशेषु च श्वासोच्छवासेषु अहिंसा जीविता दृश्यते, सैव जीवने सुखशान्त्यर्थं सर्वोत्कृष्टं साधनम् । अतो न केवलं अस्माकं देशः, अपितु विश्वस्य सकलाः देशाः अहिंसायाः स्वायत्तं विना जीवितं नैव शक्नुवन्ति। विश्वशान्तिविश्वबन्धुत्वयोः भावना अनेनैव मार्गेण समाप्नोति, नान्येन।

आधुनिकभौतिकयुगस्य चमत्त्कारेण मानवजीवनं अतीव अशान्तपूर्णं अभवत्। विज्ञानयुगेऽस्मिन् प्रवर्धमानहिंसाप्रभृतिभिः विश्वस्य मानवस्य चास्तित्वमेव प्रणश्यतीव । तदा अहिंसापालनं विना न तु मानवः सुखशान्तिमुपभुङ्क्ते, न वा समाजः। कल्पयतु यत् यदि विश्वस्य सर्वे जीवाः परस्परं हिंसायां तत्परा भवेयुस्तर्हि सृष्टेः सर्वनाशं क्षणादेव जायते।

वधकादि-हिंसक-पुरुषोऽपि न सर्वथा हिंसकः, सोऽपि निजगृहेषु पालितमार्जार-श्वान-धेनुवृषभादि पशून् संरक्षति, शुकीशुकादीन् च पालयति।

अस्माकं देशे यद्यपि अहिंसाप्रियत्वस्य न न्यूनत्वं कथमपि, तथापि अधुना अस्माकं देशस्य समाजस्य च जीवनव्यवहारे सर्वेषु कार्येषु कतिपयान् अपवादान् परित्यज्य श्रावकः बहुधा अहिंसकव्यवहारमेव समाश्रियते। यथा प्रायः अद्यापि धर्मनिष्ठजैनश्रावकः निजगृहेषु मांसभक्षी हिंसकपशूनां पंजरेषु खगादीनां च पालनं नैव प्रशंसति। निकृष्टहिंसाजन्यव्यापार-उद्योगादिभ्यः सुदूरमेव भवति। न खलु मधुमद्यमांसादीन् सेवते। नैतावत्, अपितु न हि कन्दमूलानि जीवहिंसकपदार्थां च भक्षयति। देवीदेवेभ्यः प्रदत्तानि मिष्टान्नानि न कदापि सेवते। छेदनभेदनताडनादिशब्दप्रयोगा अपि वर्जिताः। शाकाः फलानि च 'छेदनं' इत्यस्मिन् स्थाने 'सज्जीक्रियताम्' - एतादृशान् शब्दप्रयोगान् कुर्वन्ति।

जैनधर्मानुयायीश्रावकाः ज्ञानदानाय दयायै करुणायै जीवकल्याणकारीकार्येभ्यः जीवोद्धारककार्येभ्यष्च विशेष महत्त्वं प्रयच्छन्ति। जीवहिंसायाः परित्यागाय रात्रिभोजनत्यागः, जलगालनम्, प्रासुकजलग्रहणम्, सर्वथा मांसाहारत्यागः, आजीवनं विशुद्धशाकाहारग्रहणम्, व्यसनमुक्तिश्चेति अहिंसासिद्धान्तस्य जीवनव्यापी-व्यावहारिकरूपमस्ति। अहिंसाप्रियसमाजेन अन्यवर्गाः सकलसमाजाश्च कथं प्रभाविताः न स्युः? अखिले देशेऽस्मिन् अहिंसायाः अतीवप्रभावः नैतिकादर्शजीवनं च सर्वत्रं ज्ञायते। अतः अहिंसा-प्रियसमाजेन विश्वे अस्माकं देशस्य मस्तकं गौरवेन उन्नयति।

जैनधर्मदर्शनस्य अनया विशालदृष्ट्या अहिंसायै विशालत्वं व्यावहारिकत्वं च प्रदत्तम्, एतेन "वसुधैव कुटुम्बकम्" इत्यनया भावनया परस्परं सहचर्यं प्रस्थापयति। अतः विश्वबन्धुत्वस्य भावनायाः हेतुः एकमात्रं साधनं, यस्य प्रतिपादनं जैनधर्मेण कृतम्।

**वैचारिक-अहिंसा-अनेकान्तवादश्च**

अहिंसायाः जीवननिर्वहणार्थं परिपालनार्थं च वैचारिकमतमतान्तराणां दूरीकरणार्थं जैनधर्मदर्शने अनेकान्तसिद्धान्तः प्रतिपादितः। अनेकान्तवादो वस्तुतत्त्वपरक-वैज्ञानिकानुभवाधारेण प्रवर्तते, यो मानवेभ्यः उदारः सम्यक्दृष्टिश्च प्रयच्छति। प्रत्येकेषु वस्तुषु अनन्तगुणधर्मा विद्यन्ते। तेषां विविधा दृष्टयो वर्तन्ते। नाना जीवा विभिन्नाभिर्दृष्टिभिः वर्णयन्ति, यतः सत्यं न कस्यापि धर्मस्य मानवस्य वा वैयक्तिकस्वामित्वं। सर्वेषां कथनं सहिष्णुतापूर्वकं श्रृणु तथा यया अपेक्षया वर्णितं, सा अपेक्षा अवगन्तव्या, तदर्थं प्रयतितव्यम्। अस्माकं स्थूलविरोधकथनमपि केनापि पक्षेण सम्यक् भवितुं शक्नोति। अत उदारतायुक्तं समन्वयमतिना तत्कथनं श्रोतव्यं विचारः कर्तव्यश्च। तथा सति कदाग्रहः, हठवादः, पक्षपातश्चेति लवलेशमपि नास्ति। सकलपारस्परिक विवादस्य परिहरणार्थं अमोघ उपायः, यतः अनेकान्तवादानुसारेण परस्परविरुद्धावभासात्मक सापेक्षद्वयसत्यं केनापि पक्षेण सत्यमेव वर्तते। अनेन विचारेण पारस्परिकसंघर्षो विवादो वा न जायते। अनेकान्तविचारधारया प्रभावितो मनुजो यत् कथनं करोति, स एव स्याद्वादोऽस्ति। 'एव' इत्यस्य स्थाने ' अपि' इति शब्दप्रयोगो विद्यते। निजकथनमेव पूर्णतः सत्यं अपरेषां वचनं सर्वथा असत्यमिति एकान्तरूपेण नैव वदति। एतादृषी सहिष्णुतापूर्णसमन्वयबुद्धिः पारस्परिकशान्तिं प्रयच्छति। अस्य प्रयोगो न केवलं दार्शनिकक्षेत्र धार्मिकक्षेत्र च, अपितु सामाजिक-राजनैतिक-लौकिकजीवनक्षेत्रेषु अपि उपयुक्तः, तथा तेन शान्तिं प्रसरति। अतो जैनधर्मस्य अनेकान्त एव वैचारिक-अहिंसा व्यावहारिक-अहिंसा चेति कथने नातिवादः।

न खलु वैचारिकहिंसा शारीरिकहिंसायाः न्यूनमस्ति, अपितु सा अतीव भयप्रदायी वर्तते। अतोऽनेकान्तेन वैचारिकहिंसायाः समाधानं संभवति। प्रत्येकस्मिन् वस्तूनि अनन्तगुणपर्यायाः विद्यन्ते, तेषामवलोकनार्थं तावन्त्य एव दृष्ट्यो भवितव्याः। हठाग्रहात् यदि एकेनैव पक्षेण वस्तुनः सत्यतत्त्व पश्येत् तर्हि तत्र केवलं स्वमतसंग्रह एव भवेत् तथा परमतखण्डनं स्यात्। एष एष दुराग्रह वैचारिकहिंसाया जन्मदाता। वैचारिक-अनेकान्तदर्शनमेव नैतिकव्यवहारे अहिंसारूपं धारयति।

कथितमपि जैनधर्मे अहिंसायाः स्थानं सर्वश्रेष्ठं वर्तते, जैनधर्मः अहिंसा च परस्परं अन्वर्थकमेव। अनेकान्तो वैचारिकक्षेत्रेषु प्रसृतां हिंसां अपकर्षति। तीर्थंकरमहावीरसमये त्रिंशतकोत्तरत्रिषष्ठी (363) मतानि प्रचलितानि। अधुना प्रचलितानि दर्शनानीव निजसिद्धान्ताः, कथनानि, विचाराश्च समीचीना इति वदन्ति तथा अपरान् मिथ्यां कथयित्वा परस्परेषु कलहन्ति। तीर्थंकरमहावीरेण अनेकान्तस्य प्रधानत्वेन सुव्यवस्थितचिन्तनं स्वस्थपरम्परया आविष्कारं कृत्वा च वस्तुतत्त्वस्य पूर्णांशरूपेण ज्ञातुं नूतना दृष्टिः प्रदत्ता। संकीर्णकण्टकजालेभ्यः मनोहारिणी उद्यानं कर्तुं अनेकान्तचिन्तनं परमावश्यकम्। वस्तुतः विश्वस्य विविधेषु प्रान्तेषु मानवेषु च बहुधा असम्मानं, शत्रुत्वं, अविश्वासः, हठाग्रहश्चेति समस्यानां मूलकारणम्। अनेकान्तस्य सद्भावनया समाधत्ते यत् परस्परस्य भावनाः समाद्रियताम्। अनेकान्तवादे आग्रह-दुराग्रहौ स्वार्थः विवादश्चेति दुर्भावनानां अवकाश एव नास्ति। संग्रामो मानव-मानवान्तरेषु भवतु, मिथो वा बहुषु राष्ट्रेषु वा, एतस्य मूलकारणं वर्तते अहंकारः। अहंभावनया आग्रहबुद्धिः जायते एनया हठाग्रहभावनया एकान्तबुद्धया वा रागद्वेषौ, कलहः, साम्प्रदायिकोद्रेकः चोद्भवन्ति। केभ्योऽपि मानवेभ्यः, समाजेभ्यः, राष्ट्रेभ्यश्च कलहस्य संग्रामस्य वा कारणीभूतं भवति, तेन अतीव दुःखप्रदायकं संभवति। अतः अहङ्कारस्य विसर्जनं अनेकान्तवादस्य सर्वप्रथमः सर्वश्रेष्ठः विजयः।

अस्माभिः ध्यातव्यं यत् पादाभ्यां गमनकाले अस्माकं एकः पादः अग्रे भवति, तदा द्वितीयः पादः पश्चात् भवति। यदि अग्रे गन्तव्यं गतिमानं भवितव्यं च तर्हि द्वितीयः पादः प्रथमस्यापि अग्रे स्थापितव्यः, तथा सति स्वाभाविकोऽयं यत् प्रथमः पादः द्वितीयपादरूपेण पश्चाद्वर्ती भवेत्। अनेक क्रमेण गमनं भवति मनुजश्चाग्रे सरति। एष एव स्याद्वादः सापेक्षतासिद्धान्तो वा। अद्य वैज्ञानिकयुगे वयं जानीम एव, पदार्थोऽचेतनो भवतु वा चेतनो वा, अनन्तगुणधर्मशक्तीनां संग्रहितोऽखण्डरूपात्माकोऽस्ति। तस्य अनन्तशक्तिषु धर्मेषु च केचित् परस्परसहोयोगिनः, तथैव परस्परविरोधिनोऽपि। वर्तमानजगतो विचारधारया अहिंसामूलकसिद्धान्तस्य व्यापकरूपेण अतीव महत्त्वं वर्तते। अद्यतने एतस्य सर्वश्रेष्ठरूपेण आवश्यकत्वमपि विद्यते, येन निजपरम्परागतवैशिष्ट्यानां संरक्षणपूर्वकं विभिन्ना मानवाः समुदायाः राष्ट्राश्च परस्पराणां सन्निकटं आगच्छेयुः, तथा तेन व्यापकमानवतादृष्टिर्विकसते। एतत् अनेकान्तात्मकसमन्वयदृष्टिना संभवति। अनेकान्तादिसिद्धान्तैरेव फलिताः जैनदर्शनस्य सार्वभौमिकपक्षाः केचित्। तथाहि- अहिंसा, समानता, सापेक्षता, आत्मानुशासनम्, आत्मस्वातन्त्र्यम्, व्यक्तिस्वातन्त्र्यं चेति।

अनेकान्तवादस्य द्वितीयो रूपः स्याद्वादः, सापेक्षत्वमेव स्याद्वादस्य रहस्यम्। एतेनैव सत्यज्ञानं निरूपणं च शक्नोति। यो जनतन्त्रस्य प्रजातन्त्रस्य हार्दः। किन्तु कतिपयजनाः एव सत्ता-अधिकारपदानां सन्निहिता वर्तन्ते, अन्यान् अवकाशो नैव लभते, तेन सर्वत्र स्वाभाविकरूपेण असंतोषं अभिलाषां च प्रसरति। एतादृशी स्थितिः अधुना अस्माकं देशे देशान्तरेषु च स्पष्टतो ज्ञायते। अनेकान्तसिद्धान्त एवं एतेभ्यः सर्वेभ्यः संरक्षति । इत्थं अहिंसायाः व्यावहारिक स्वरूपं सर्वेषां दैनिकव्यवहारेपि सम्यक्तया साकारं भवितुं शक्नोति ।